# Rishikashyapaproktam Shivalingarchanopadesham

# ऋषिकश्यपप्रोक्तं शिवलिङ्गार्चनोपदेशम्

## Document Information

Text title : Rishikashyapaproktam Shivalingarchanopadesham

File name : RRiShikashyapaproktaMshivalingArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 8 | vAvRittashlokAH ||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ऋषिकश्यपप्रोक्तं शिवलिङ्गार्चनोपदेशम्

(शिवरहस्यान्तर्गते भीमाख्ये)
कश्यपः (उवाच)
बिल्वपत्रैः प्रसूनैर्वा त्रिवारं सकृदेव वा ।
मृल्लिङ्गे रसलिङ्गे वा धातुजे नार्मदेऽपि वा ॥ २०॥

रत्नलिङ्गेषु वा सम्यक्स्थावरे वा चरेऽपि वा ।
स्वायम्भुवे वा दैवे वाप्यर्षे वा मानवैः कृते ॥ २१॥

उत्तरोत्तरतोत्कर्षात्पूजनीयः सदाशिवः ।
लिङ्गेष्वेतेषु भक्त्यैव नियमाच्छङ्करार्चकः ॥ २२॥

स्फाटिके पूजितः शम्भुः प्रददाति च वाञ्छितम् ।
लिङ्गार्चनेन सकलं वाञ्छितं प्राप्यते नृभिः ॥ २३॥

सर्वे लिङ्गार्चनेनैव प्राप्यन्ते हि मनोरथाः ।
शिवस्य लिङ्गपूजैव मुक्तिदा श्रुतिदर्शिता ॥ २४॥

आमनन्त्यण्डजश्रेष्ठ जाबालश्रुतयो ध्रुवम् ।
शिवलिङ्गमनभ्यर्च्य न पेयं जलमप्यणु ॥ २५॥

फलं वा यद्यदा भोज्यमन्नं वा शङ्करार्पितम् ।
भुञ्जीयाच्छ्रीमहेशाय यन्निवेदितमुत्तमम् ॥ २६॥

अनभ्यर्च्य महादेवं योऽश्नीयत्फलमम्बु वा ।
स पापी नरके घोरे तिष्ठत्याभूतसम्प्लवम् ॥ २७॥

यद्यदह्नाच्चरेत्पापं यच्च तापत्रयात्मकम् ।
तदह्नात्प्रतिमुच्येत शिवलिङ्गार्चनेन हि ॥ २८॥

प्रदोषे यः शिवं दृष्ट्वा परिपूज्य स मुक्तिभाक् ।
(प्रदोषे यः शिवं दृष्ट्वा पूजयेत्स विमुक्तिभाक् ।)

द्वित्रैर्वा बिल्वपत्रैर्वा नीरैर्वापि महेश्वरम् ॥ २९॥

सोमवारे तथा सायं शतजन्मघनाशनम् ।
कालाष्टम्यां कालकालं सायमभ्यर्च्य शङ्करम् ॥ ३०॥

भूतायां वै भूतनाथं सायमभ्यर्च्य शङ्करम् ।
नैवेद्यं निशि भुक्त्वैव सर्वथा गणपो भवेत् ॥ ३१॥

संसाररोगनिर्मुक्तो मुक्तये कल्पते नरः ।
तथा पर्वस्वपि शिवं ग्रहणे सोमसूर्ययोः ॥ ३२॥

समभ्यर्च्यामरश्रेष्ठं सर्वकालेष्वपि ध्रुवम् ।
यावज्जीवं समभ्यर्च्य जीवन्मुक्तो भवेन्नरः ॥ ३३॥

प्रमादादेकदा त्यक्त्वा शिवलिङ्गार्चनं सुत ।
वापयित्वा शिरः केशान् प्राश्य गव्यादिपञ्चकम् ॥ ३४॥

रुद्रैर्होमं हुनेदेवं चरुणा सर्पिषा द्विजः ।
स्वसूत्रोक्तेन मार्गेण कृत्वा पूर्वापरक्रमम् ॥ ३५॥

शाम्भवं भोजयित्वैकमुपोष्याभ्यर्च्य शूलिनम् ।
पूर्वाहारपरहे चैव कृत्वा पूजेदयं पुनः ॥ ३६॥

भुञ्जीत शाम्भवैः सार्धं नैवेद्यं यच्छिवार्पितम् ।
तत्पापमुक्तो भवति इत्याह परमेश्वरः ॥ ३७॥

तस्मादतन्द्रितो लिङ्गे पूजनीयः सदाशिवः ।
शिवप्रसादजनकं शिवलिङ्गस्य पूजनम् ॥ ४२॥

भुक्तिदं मुक्तिदं चापि ज्ञानदं सर्वदा नृणाम् ।
अवश्यं तद् द्विजातीनामित्याह शशिशेखरः ॥ ४३॥

तस्मात्सम्पूजयेत्साम्बं लिङ्गमेव पिनाकिनः ।
शिवलिङ्गार्चनेनैव शिवस्तुष्यति नान्यथा ॥ ४८॥

॥ इति शिवरहस्यान्तर्गते ऋषिकश्यपप्रोक्तं शिवलिङ्गार्चनोपदेशं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । भीमाख्यः अष्टमांशः । अध्यायः ८ । वावृत्तश्लोकाः ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 8 . vAvRRittashlokAH ..

Notes:

Ṛṣi Kaśyapa ऋषि कश्यप delivers Upadeśa उपदेश (to Pataṅga पतङ्ग) about worship of Śivaliṅga शिवलिङ्ग. He especially mentions about worship during Pradoṣa प्रदोष, Somavāra सोमवार, Sayaṅkāla सायङ्काल, Kālāṣṭamī कालाष्टमी.

Proofread by Ruma Dewan

---

*Rishikashyapaproktam Shivalingarchanopadesham*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*